# SANSKRIT WRITINGS OF EUROPEAN SCHOLARS

JÑĀNAPĪṬHA LAUREATE

**Satya Vrat Shastri**

HONORARY PROFESSOR, SPECIAL CENTRE FOR SANSKRIT STUDIES
JAWAHARLAL NEHRU UNIVERSITY

FORMERLY PROFESSOR AND HEAD, DEPARTMENT OF SANSKRIT
UNIVERSITY OF DELHI

EX-VICE-CHANCELLOR
SHRI JAGANNATH SANSKRIT UNIVERSITY, PURI (ORISSA)

VIJAYA BOOKS
Delhi

*Published by* :
**VIJAYA BOOKS**
1/10753, St. No. 3, Subhash Park,
Naveen Shahdara, Delhi-110 032,
Ph. : 22822514, 9910189445
*Email* : vijyabooks@gmail.com

© Author

First Edition : 2012

ISBN : 978-81-910948-3-1

Price : ₹ 395/-

*Printed by* :
**Vikas Computer & Printers**
Naveen Shahdara, Delhi-110032

# समकालिके समाजे अहिंसायाः प्रासंगिकता

In continuation with the activity that the ICCR started, a competition in spoken Sanskrit, the second of its kind, was organized at the University of Heidelberg, Germany in 2010. In this competition it was Gianni Pellegrini, a young Sanskrit scholar of Italy who won the Sarasvati Award. After obtaining Laurea (corresponding to Post-Graduation) in Oriental Language and Literature from the University of Venice, Italy in 2000 he joined the Sampurnananda Sanskrit University, Varanasi from where he first did the Certificate course in Sanskrit and later proceeded to pursue studies for the Shastri and the Acharya courses in Śāṅkara Vedānta which he successfully cleared. His long stay in Varanasi made him pick up Hindi so well that he can converse in it with the fluency of a native speaker. This was one side of his acquisition. The other side was his deep insight into the ancient Sanskrit texts, particularly those related to Vedānta; he has authored a number of books on it; that led him to practise speaking in Sanskrit due as much to his innate urge for it as also to the need to interact with the Sanskrit community of the University. The extempore speech that he delivered at the competition he later put in writing which is being reproduced below to acquaint the readers with the felicity of its expression.



अनादिकालप्राप्तां परम्परां तथा प्रचलिताश्चिरन्तनोक्तीश्च आदृत्य, चिकीर्षितायाः चेष्टायाः निर्विघ्नपरिसमाप्त्यर्थम् अत्र शिखरिणीवृत्तबद्धं भगवत्पादीयं वाग्देविस्मरणरूपं मंगलं आचर्यम्—

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नीं पद्मां हरसहचरीम् अद्रितनयाम्।
तुरीया कापि त्वं दुरधिगमनिस्सीममहिमा
महामाया विश्वं भ्रमयसि परब्रह्ममहिषि॥

इति सौन्दर्यलहर्याम्।

अत्र किं वक्तव्यम्? किं च लेख्यम्? येषु निगूढविषयेषु विदुषामपि मतिः परिभ्रमति किमुत तत्र मम बालकस्य शेमुषी? भवतु नाम दुर्जनानां परिहासः, मया तु "ममापि एष स्तोत्रे हर निरपवादः परिकरः" इति महिम्नोवाक्यं मनसि निधाय, अस्मिंश्च निबन्धे लघुकाये सत्यपि "अहिंसा तस्याः समकालिके समाजे प्रासंगिकता" चेति विषयोऽधिकृतः। तत्र किञ्चित् विमृश्यते।

सर्वप्रथमं शाब्दिकविचारः प्रस्तूयते। शास्त्रपद्धतिम् अनतिक्रम्य यदा नकारात्मकपदार्थः परिगण्यते, तथा प्राथम्येन तस्य सकारात्मकरूपं चिन्तनीयम्, तद्वैपरीत्येन वा भावपदार्थाद् अभावात्मकविमर्शः। "अथातो धर्मजिज्ञासा" इति शाबरभाष्यप्रसंगे अधर्मविचारपूर्वकं धर्मचिन्तनमितिवत्। अत्र तु अहिंसाया उपात्तविषयस्य विपरीतं पदं हिंसैव वर्तते।

हिंस्-धातोः अङिति प्रत्यये संप्राप्ते, स्त्रीत्वविवक्षायाम् अजन्तादीनां टाप्प्रत्ययात् हिंसेति शब्दो निष्पद्यते। हिंसनं हिंसा। हिंस्यते, हन्यते, अपभाष्यते अनया इति हिंसा। प्राणिनां शारीरं मानसं वा परिपीडनं हिंसेति। इयं च हिंसा मुख्यतया त्रिधा विभज्यते—मनसा वाचा कर्मणा चेति। यत् तु सामान्यतः हिंसाविषये मनुते जनः "प्राणिवध एव हिंसा" इति, नैषा मान्यता पूर्णरूपेण सत्यतां भजते, सा च केवलं कायिकी हिंसा। किंबहुना, विविधानां भूतानां येन केनापि प्रकारेण क्लेशप्रापणं हिंसेति भवितुमर्हति। तस्मात् मनसा हिंसा परापकारचिन्तनम्, अन्यान् प्रति असूया, तेषां च अपकर्षदिदृक्षा। वाचिकी च हिंसा कटुवाक्यप्रयोगो येन परेषामभ्यन्तरदुःखोत्पादनं स्यात्।

नञ्पूर्वको यदि हिंस्धातुः भवेत्तर्हि "न विद्यते हिंसा यत्र सा अहिंसा" इत्यर्थो भवेत्।

ननु शास्त्रेषु नञोऽव्ययस्य षडेव अर्थाः प्रसिद्धाः। यथा—

तत्सादृश्यम् अभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥

इति वाक्यपदीये। तेषु चाभिधेयेषु कतमोऽहिंसेति पदे प्रयुक्तो नञभिप्राय: ? इति शंकायां सत्याम् उच्यते हिंसाया अत्यन्ताभावोऽहिंसा। सा च द्विधा बाह्या आभ्यन्तरा चेति। तत्र आद्या जन्तून् प्रति मानसवाचिकदैहिकसर्वविधहिंसापरित्याग:। अन्या च स्वहृदि हिंसाभावनानुदये निरन्तरप्रयत्न:।

विशेषत: भारतदेशे प्राचीनकालादेव संन्यासिन: श्रमणाश्च ये परिव्राजका:, तेषां कृतेऽहिंसा विहिता एव भवति स्म, यत: सर्वभूतेभ्य: कारुण्यरूपा यतीनां साधना। अहिंसा च पातञ्जलयोगशास्त्रे यमेषु स्मृतास्ति "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा:" इति।

न तु भिक्षाटनानामेव धर्मसाधनमहिंसा, किञ्च विविधवादविवादप्रधानेऽपि लोके अस्या अहिंसाया: महत्त्वविषये निगमागमानाम् ऐकमत्यं भवति। अत एव महर्षिणा मनुना चातुर्वर्ण्यार्थम् अहिंसामहिमा उपस्थाप्यते—

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रह:।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनु: ॥

नैषा चतुर्णां वर्णानामेव संपत्ति:, तेन तस्या: व्यापकत्वं न स्यात्। अहिंसाया सार्वभौमत्वमेव परिकीर्त्यते। इयमहिंसा न केवलं भारतीयसभ्यतायां परमो धर्म आख्यायते, अपितु यत्र कुत्रापि योग्यसंस्कृतिप्राप्तिर्भवति तत्रापि दृश्यते। सा च विश्वस्मिन् जगति शान्तिप्रदात्री, सच्चरित्रमूला अभ्युदयसहचारिणी, नि:श्रेयसपथाभिवृद्धिहेतुश्च।

अहिंसाया जीवनोपयोगित्वम् आश्रित्यैव प्राचीनै: ऋषिभि: शास्त्रकारैश्च तस्या: प्रासंगिकता उद्घोष्यते। अहिंसाया अपराभिधानं प्रेमेति अपि कथ्यते। अनया प्रेमभावनया स्वेस्वराष्ट्रहितं संपादयितुं शक्यते। भगवान् मनु: अहिंसाया: प्रासंगिकत्वं वर्णयन् निगदितवान् यदहिंसया मानवै: सर्वमपि कार्यं साधितं भवति। मधुरया वाचा यथा कार्यसिद्धि: संभवति, न तथा प्रकारान्तरेण।

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता॥

इति मनुस्मृते:। अहिंसा स गुणो येन विश्वबन्धुत्वं विश्वप्रेम विश्वहितसाधनं च संभाव्यते। अहिंसा एव सदाचार:। तस्या: परिपालनार्थम् अनेके महानुभावा अस्मिन् धरित्रीतले अवतीर्य, तयैव अहिंसया संरक्षिता: सन्त: लोकसंग्रहाय परोपकाराय च यावज्जीवनं व्यतियापितवन्त:। कथमद्यापि ईदृशो व्यवहार ईदृशी च भावना आत्मसान् न चिकीर्ष्यते? मन्येऽहं संभवत्येव, यतो यो हि प्राणिनां स्वभाव: पूर्वेषां विदुषां प्रतिपादित आसीत्, तस्मात् स्वभावाद् अद्यतनानां स्वभावोऽपि न व्यभिचरति। अहिंसाया: दृढेण शस्त्रेण महात्मा गांधी: पराधीनतापाशं संछिद्य भारतीयेभ्य: स्वतन्त्रतां प्रापयामास।

एवं मम ध्रुवा मतिरस्ति यत् यथा सर्वेषु कालेषु अभूत् तथा अस्मिन्नत्याधुनिके समाजेऽपि, यस्मिन् समे जन्तव: नैसर्गिकमृदुतां विहाय **औपाधिकीं** कठोरतां प्रपद्यन्ते। अधुनापि अहिंसाया: कृतेऽवकाशो विद्यते।



कस्य न तुष्टये कोमलता? शान्ति: कस्मै न रोचते? इति विमुग्धोऽहं पृच्छामि। न च कदापि कथमपि चाहिंसामन्तरेण संतोषसत्याक्रोधदयादीन् उत्कृष्टान् गुणान् अधिगच्छति मानव:। यदा केनापि जनेन धैर्यम् आत्मनियन्त्रित्वम् च उत्सृज्य प्रवृत्यते हिंसिकाया: क्रियाया अनुरूपं तदा सा हिंसा क्रूरतरत्वात् क्रूरतमत्वम् आपद्यते। अन्ततो गत्वा ध्रुव एव विनाश:। तस्मान्न हिंसया प्रेय: श्रेयश्च लब्धुं शक्ष्यति कोऽपि, अतोऽहं ब्रवीमि अहिंसा आश्रयणीया बुधै:। अवलोक्यते यद् आक्रान्तोऽपि अहिंसाश्रितो मनुष्य: कथमपि न प्रतिकरोति। अत्र तु नैव नैव विस्मरणीयं यत् यदि स न विरुणद्धि, न भयात्, न च दौर्बल्यात्, नैव क्लैब्याच्च एवं व्यवहरति, अपितु स्वस्वभावम् अनुसृत्य। स हि प्रबल:, स विजयी, स एव वीर:। अस्मिन् प्रसंगे कदापि उपदेशिकां कथां पठितवान् अहम्, या सर्वैरपि अन्वेष्टव्या।

नदीतीरे महारण्ये गुहान्तरे साधनातत्पर: एक: साधु: प्रत्यवसत्। स सूर्योदयात् प्राक् प्रतिदिनं स्नानार्थं नदीं गच्छति स्म। एकदा स्नात्वा जलाद् बहिरागच्छन् उदकात् निर्गन्तुं यतमानम् एकं वृश्चिकं दृष्टवान्। स भिक्षु: दयाभिभूत: सन् कीटम् उद्दिधृक्षु: स्वकरेण तं गृहीतवान्। वृश्चिकेन च इतोऽपि भयभीतेन सता स साधुर्दष्ट:। तीव्रदु:खकृतकम्पनात्, परिव्राजकहस्तात् स वृश्चिक: जलेऽपतत्। एवं च साधु: तं पुन: उद्धृतवान्, अथ पुनरपि वृश्चिकदंश:। एवं त्रिधा, चतुर्धा च कुर्वन्तं तं संन्यासिनं दृष्ट्वा किञ्चिद् दूरमुपविष्टोऽन्यो जनोऽवदत्—"हे मूढ! किं नाधिगच्छसि यत् दंशो वृश्चिकस्य स्वभाव: ? यदा यदा तं त्वम् उद्धरिष्यसि, तदा तदा स त्वां दंक्ष्यति।" एतत् श्रुत्वा साधु: मधुरस्वरेण प्रत्युवाच—"सत्यं त्वं वक्षि वत्स! तथापि नाहमन्यथा कर्तुं समर्थोऽस्मि। यथा अस्य स्वभावो दंशनं तथैव दयाभावेन मम स्वभाव एतत्समुद्धरणमिति।"

अस्तु तावत् अहिंसा धर्ममार्ग इति वर्तते सर्वसाधारणी धृति:, परन्तु न सा सदैव न्यायमार्ग:। अहिंसाया अपि अस्ति सीमा।

इदं मम तात्पर्यम्—यदा क्रूरान्यायाचार: केनापि क्रियते, यदा च निरपराधा: प्राणिन: परिपीड्यन्ते, तस्मिन्नवसारे यदि कोऽपि अहिंसाम् आश्रित्य न रुणद्धि भ्रष्टचारिणं, तदा तदौदासीन्यं नाहिंसा, किन्तु हिंसा। तत: स पापभागी भवति। बलादपि हिंसाविरोधे कृते तु, न तत् हिंसनं यत एकदृष्ट्या प्राणिसंरक्षणं तत्, अन्यदृष्ट्या च दुराचारिण: हिंसाकरणात् प्रतिबन्ध:।

सत्यमेतत् यत् अस्माकं समकालिके समाजे येन केन प्रकारेण हिंसात्यन्ताभावो न परिकल्पितुं शक्यते। वस्तुतस्तु अद्य तात्त्विकीं बुद्धिपूर्विकाम् अहिंसाम् आश्रितो मानव: हीरक इव प्रकाशते। क इह रागत: प्राप्तोत्तेजनं विरोद्धुं शक्त: ? क एवंविध: शूर: ? कोऽयं बलवत्तम: ?

यदि लक्षाणां मध्ये एको निर्भयोऽहिंसको भवेत् तर्हि अस्मत्समाजेऽपि भविष्यति नूतन उष:काल:, नूतनं च ज्योतिरिति शम्।